आरण्यकम् उपनिषच्च

प्रस्तावना

मन्त्रब्राह्मणयोर्वेदनामधेयम् इति श्रुत्यनुसारेण मन्त्रब्राह्मणौ वेदस्य द्वौ भागौ। तत्र ब्राह्मणस्य अपि भागत्रयमस्ति। ते च ब्राह्मणम् आरण्यकम् उपनिषच्चेति। ब्राह्मणग्रन्थानां विस्तृतपरिचयः पूर्वमेव अभवत्। अधुना आरण्यकानां परिचयः प्रस्तूयते। ऋग्वेदादिभागानुसारेण आरण्यकानि अपि बहूनि सन्ति। तेषु कानिचित् विशिष्टानि आरण्यकानि यथा ऐतरेयारण्यकं, बृहदारण्यकं , शांख्यायनारण्यकं तैत्तिरीयारण्यकं चेति अत्र प्रस्तूयन्ते। आरण्यकानि प्रपाठकेषु विभज्यन्ते। ते च अनुवाकेषु विभज्यन्ते। महाव्रतस्य अनुष्ठानवर्णनं-निष्कैवल्यशास्त्र – प्राणविद्या - पुरुषप्रभृतीनाम् वर्णनं केषुचित् स्थलेषु ब्रह्मविद्यायाः गूढतया विस्तारेण च वर्णनमपि वर्तते। एतानि कस्मिन् वेदे प्रपाठके अनुवाके च सन्ति, तदपि अत्र उपस्थाप्यते।

अस्य अध्यायस्य द्वितीये भागे उपनिषदां वर्णनं विद्यते। उपनिषदो भारतीयायाः अध्यात्मविद्याया ज्वलन्ति रत्नानि सन्ति। महर्षयो यानि आध्यात्मिकतत्त्वानि ध्यानमाध्यमेन साक्षाद् अकुर्वन् तानि सर्वाणि तत्त्वानि अत्र वर्णितानि सन्ति। उपनिषत् परा विद्येति कथ्यते। वेदान्ताः एव उपनिषदः। उपनिषद्-शब्दस्य रहस्यम् इत्यर्थः। अध्यात्मविद्यायाः रहस्यप्रतिपादका वेदभागा उपनिषदः इति कथ्यन्ते। महर्षय आध्यात्मिक्या विद्यया तेषां गूढतमानां रहस्याणां विशदतया विचारं कुर्वाणाः प्राप्यन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- विविधानाम् आरण्यकानां विषये ज्ञातुं प्रभवेत्।
- उपनिषदां सामान्यरूपेण परिचयं प्राप्तुं शक्नुयात्।
- आरण्यकानां नामकरणस्य सार्थकतां जानीयात्।
- केनोपनिषदः छान्दोग्योपनिषदः च विशेषतया परिचयं प्राप्स्यति।

६.१) आरण्यकस्य सामान्यपरिचयः

आरण्यकोपनिषदौ ब्राह्मणानां परिशिष्टग्रन्थसमानौ भवतः। यथा ब्राह्मणग्रन्थेषु सामान्यप्रतिपाद्यविषयेभ्यो भिन्नविषयाणां प्रतिपादनं विद्यते तथा एतेषु अपि वर्तते। सायणाचार्यस्य मते अस्य ग्रन्थस्य अरण्ये पाठ्यत्वात् 'आरण्यकम्' इति नामकरणं सार्थकम् एव इति। यथा-

'अरण्याध्ययनादेतद् आरण्यकमितीर्यते।

अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते।।' -(तै० आ० भा०, श्लो० ६)

एतेषां ग्रन्थानां मननस्थानम् अरण्यस्य एकान्तशान्तं वातावरणम्। ग्रामाभ्यन्तरे अस्य अध्ययनं कदापि लाभप्रदम् उचितम् उपादेयं च नासीत्। आरण्यकस्य मुख्यप्रतिपाद्यविषयः न केवलं यज्ञः, अपि तु यज्ञ-यागाद्यभ्यन्तरे विद्यमानस्य आध्यात्मिकतथ्यस्य मीमांसापि अस्ति। यज्ञीयानुष्ठानेन सह तदन्तर्गतः दार्शनिकविचारः अपि अस्य मुख्यविषयोऽस्ति। संहितामन्त्रेषु यस्या विद्यायाः सङ्केतमात्रम् एव उपलब्धं भवति अत्र तस्या विश्लेषणम् अपि वर्तते।

आरण्यकस्य महत्त्वं सर्वत्र स्वीकृतमस्ति। महाभारतस्य कथनमस्ति यद् औषधीभ्यो यथा अमृतम् उद्धृतं तथैव वेदेभ्यः सारं समुद्धृत्य आरण्यकं प्रणीतम्। यथा-

'आरण्यकञ्च वेदेभ्य ओषधिभ्योमृतं यथा।' -(महाभा० १।२६५)

मन्त्रब्राह्मणात्मकस्य वेदस्य यस्मिन् अंशे प्राणविद्यायाः प्रतीकोपासनायाश्च विषये वर्णनमस्ति स एव अंशः आरण्यकमिति कथ्यते। आरण्यकमपि ब्राह्मणस्य एव अंशः अस्ति। तस्य विशिष्टताप्रदर्शनाय 'रहस्यब्राह्मणम्' इति नाम अपि प्रसृतम् अस्ति। निरुक्तस्य टीकायां (१।४) दुर्गाचार्येण 'ऐतरेयके रहस्यब्राह्मणम्' इति कथयित्वा ऐतरेयारण्यकस्य उद्धरणं दत्तम् (२।२।१)। अनेन रहस्यब्राह्मण-आरण्यकयोः एकतायाः सिद्धिर्भवति, आरण्यकस्य नामान्तरं रहस्यमपि अस्ति (गोपथ० ब्रा० १०)। यतो हि यथा आरण्यकं यज्ञीयगूढरहस्यस्य प्रतिपादनं करोति तथा कर्मकाण्डस्य दार्शनिकव्याख्याम् अपि प्रस्तौति। मुख्यतः ब्रह्मविद्या रहस्यशब्देन ज्ञायते। विषयविवेचनस्य दृष्ट्या आरण्यकेन साकम् उपनिषदः साम्यमस्ति। अतो बृहदारण्यकादिग्रन्थाः उपनिषदिति शब्देन अपि व्यवह्रियन्ते। किञ्च वर्णनीयविषयस्य साम्यत्वेन अपि तयोः मध्ये किञ्चित् पार्थक्यं परिलक्ष्यते। आरण्यकस्य मुख्यविषयः प्राणविद्या तथा प्रतीकोपासना अस्ति। उपनिषत्सु वर्णितो विषयः निर्गुणब्रह्मप्राप्तेः उपायः अस्ति। यद्यपि अत्र भेदः वर्तते तथापि द्वौ अपि ग्रन्थौ रहस्यग्रन्थौ स्तः।

पाठगतप्रश्नाः-१

१. आरणयकं केषां ग्रन्थानां परिशिष्टभागः।

२. सायणाचार्यमतेन आरण्यकनामकरणस्य सार्थकश्लोकं लिखत?

३. आरण्यकस्य मननाय उपयुक्तस्थानं किम्।

४. यज्ञानुष्ठानं दार्शनिकविचारश्च कस्य ग्रन्थस्य मुख्यविषयः।

५. आरण्यकं कस्य सारभूतम्।

६. आरण्यकं वेदेभ्य ओषधिभ्यः सारभूतमित्यत्र किं प्रमाणम्।

७. रहस्यब्राह्मणं किम्।

८. आरण्यकं कस्य गूढरहस्यं प्रतिपादयति।

९. रहस्यशब्देन कस्याः विद्यायाः मुख्यतया प्रतिपादनं क्रियते।

१०. आरण्यकोपनिषदोः कः भेदः।

६.२) ऐतरेयारण्यकम्

ऋग्वेदस्य द्वयोः आरणयकयोः मध्ये अन्यतमम् इदम् आरण्यकमस्ति। इदमारण्यकम् ऐतरेयब्राह्मणस्यैव परिशिष्टभागोऽस्ति। अस्मिन् पञ्च आरण्यकानि सन्ति। एतानि आरण्यकानि भिन्नग्रन्थरूपेण मन्यन्ते।

प्रथमारण्यके महाव्रतस्य वर्णनमस्ति। महाव्रतमिदम् ऐतरेयब्राह्मणस्य प्रपाठकत्रयस्य गवामयनस्य एव एकांशोऽस्ति। द्वितीयप्रपाठकस्य प्रथमेषु त्रिषु अध्यायेषु उक्थ-निष्कैवल्य-शस्त्र-प्राणविद्या-पुरुषप्रभृतीनां विवेचनमस्ति। चतुर्थ-पञ्चम-षष्ठाध्यायेषु ऐतरेयोपनिषद् अस्ति। तृतीयारण्यकस्य अपरं नाम अस्ति संहितोपनिषद्। अस्याम् उपनिषदि संहिता-पदक्रमपाठानां वर्णनं तथा स्वरव्यञ्जनादिस्वरूपस्य च विवेचनमस्ति। अस्मिन् खण्डे शाकल्यस्य माण्डुकेयस्य च मतानाम् उल्लेखोऽस्ति। अयम् अंशः असन्दिग्धरूपेण प्रातिशाख्यनिरुक्ताभ्यां प्राचीनतरः अस्ति। व्याकरणविषयस्य अपि अयमंशः नितान्तं प्राचीनः अस्ति। एतेन अस्य आरण्यकस्य समयस्य पूर्वसीमा विक्रमपूर्वसहस्रशतकम् इति मन्तव्यं भवति। तेन आरण्यकमिदं यास्कपूर्ववर्ति इति मन्यन्ते नैके। यतः अस्मिन् अंशे निर्भुज-प्रतृण्ण-सन्धिसंहितादयः पारिभाषिकशब्दाः प्रयुक्ताः सन्ति। चतुर्थारण्यकम् अतीव लघु अस्ति। अस्मिन् आरण्यके महाव्रतस्य पञ्चमे दिने प्रयोक्तव्या महानाम्न्यः ऋचः सन्ति। अन्तिमारण्यके निष्कैवल्यशस्त्रस्य वर्णनमस्ति। एतेषु आरण्यकेषु प्रथमत्रयस्य रचयिता ऐतरेयः, चतुर्थस्य आश्वलायनः तथा पञ्चमस्य शौनक इति मन्यते। अयं शौनको बृहद्देवतायाः निर्माताऽस्ति। डा० कीथमहोदयः आरण्यकमिदं निरुक्तात् परं प्रणीतम् इति मत्वा अस्य समयं विक्रमपूर्वं षष्ठशतकं मन्यते। किञ्च यथार्थत आरण्यकमिदं निरुक्तात् प्राचीनतरमस्ति। आरण्यकमिदं महिदास-ऐतरेयस्य प्रथमत्रयाणाम् आरण्यकानां कर्त्तृत्वेन ऐतरेयब्राह्मणस्य एव समकालिकम् इति सिद्धं भवति।

पाठगतप्रश्नाः-२

११. ऐतरेयारण्यकं कस्मिन् वेदे अन्तर्गतम्।

१२. ऐतरेयारण्यकं कस्य परिशिष्टग्रन्थः।

१३. ऐतरेयस्य प्रथमारण्यके कस्य वर्णनम् अस्ति।

१४. द्वितीयप्रपाठकस्य आदिमेषु त्रिषु अध्यायेषु कस्य वर्णनम् अस्ति।

१५. अन्तिमारण्यके कस्य वर्णनम् अस्ति।

१६. तृतीयारण्यकस्य अपरं नाम किम्।

१७. संहितोपनिषदि कस्य वर्णनम् अस्ति।

१८. द्वितीयचतुर्थारण्यकयोः रचयितारौ कौ।

१९. बृहद्देवतायाः निर्माता कः।

२०. अर्वाचीनमित्यस्य कः अर्थः।

६.३) शाङ्ख्यायनारण्यकम्

ऋग्वेदस्येदं द्वितीयमारण्यकमस्ति। अस्मिन् पञ्चदश आध्यायाः सन्ति। आतृतीयाध्यायात् षष्ठ्याध्यायपर्यन्तं कौषीतकि-उपनिषदिति कथ्यते, तथा सप्तमाष्टमौ अध्यायौ संहितोपनिषदिति कथ्येते। एतद्भिन्नेषु अध्यायेषु आरण्यकस्य मुख्यविषयाणां प्रतिपादनमस्ति। प्रथम-द्वितीयाध्याययोः महाव्रतस्य वर्णनम् उपलब्धमस्ति। अत्र एकः यज्ञः अस्ति, गवामयन-नामकयज्ञः इति तस्य नाम। तस्य यज्ञस्य यः अन्तिमदिवसः ततः पूर्वस्मिन् दिवसे महाव्रतस्य अनुष्ठानं भवति। अस्मिन् एव दिने सवनत्रयमपि भवति। अस्मिन् आरण्यके होतृनामकः यः ऋत्विक् अस्ति तेन प्रयुक्तानां शास्त्राणां वर्णनमस्ति। महाव्रतस्य सर्वाणि आनुष्ठानिकानि विधानानि शाङ्खायनश्रौतसूत्रे विद्यते। अस्य अनुष्ठानस्य सर्वतः महत्त्वपूर्णम् अङ्गं महदुक्थम् अथवा निष्कैवल्यशस्त्रम्। अस्य सविस्तृतं वर्णनं तत्र एव अन्येषु अध्यायेषु (१।४।५,२=१-१७) उपलभ्यते।

कौषीतकिब्राह्मणोपनिषद् चतुर्षु अध्यायेषु विभक्ता अस्ति। एषा उपनिषत् शाङ्खायनारण्यकस्य एव अंशो वर्तते। एषा कौषीतकिब्राह्मणोपनिषत् तथा संहितोपनिषत् च अध्यायस्य पुरोभागे वर्तेते। इमे द्वे उपनिषदौ शाङ्खायनारण्यकस्य अविभाज्यम् अङ्गमस्ति। अस्य वर्णनमुपनिषदां वर्णनप्रसङ्गे अग्रे भविष्यति। नवमाध्याये प्राणस्य श्रेष्ठताया वर्णनमस्ति। दशमाध्याये आन्तराग्निहोत्रस्य साङ्गम् उपाङ्गम् इत्यादिकं वर्णितमस्ति। अस्य अध्यायस्य कथनमस्ति यद् अग्निहोत्रेण यस्य देवस्य सन्तृप्तिः विधीयते, यस्य वा देवस्य आप्यायनं क्रियते, स देवः जीवस्य अभ्यन्तरे एव विद्यमानः अस्ति। बाह्याग्निहोत्रेण अस्य तृप्तिर्भवति। यो हि साधकः तत्त्वमिदम् अज्ञात्वा केवलं बाह्यहवने एव आसक्तो भवति, सः भस्मचये एव जुहोति। मृत्योः अपसारणाय एकस्य विशिष्टयागस्य एकादशतमाध्याये विस्तृतं विवरणं प्रदत्तमस्ति। द्वादशतमाध्याये बिल्वफलेन मणिनिर्माणस्य प्रक्रियायाः, कालस्य तथा स्वरूपस्य च वर्णनमस्ति। यं धृत्वा साधकः शत्रूणामुपरि विजयं लभते। त्रयोदश-चतुर्दशयोः अध्याययोः अतिसंक्षेपेण आत्मनः ब्रह्मणा

सह एकत्वप्राप्तिः जीवस्य सर्वोत्तमोपलब्धिः इति कथ्यते। 'आत्मावगम्योऽहं ब्रह्मास्मीति' इयम् एव उक्तिः अस्यारण्यकस्य सर्वोत्तमः उपदेशः अस्ति-

'ऋचां मूर्धानं यजुषामुत्तमाङ्गं
साम्नां शिरोऽथर्वणां मुण्डमुण्डम्।
नाधीतेऽधीत वेदमाहुस्तमज्ञं
शिरस् द्वित्वासौ कुरुते कबन्धम्।।'

पञ्चदशतमाध्याये आचार्यस्य वंशवर्णनमस्ति। अनेन अध्यायेन स्पष्टरूपेण प्रतीतो भवति यद् अस्य आरण्यकस्य द्रष्टुः ऋषेर्नाम गुणाख्यशाङ्ख्यायनः आसीत्। तस्य गुरोर्नाम कहौलः कौषीतकिः इति आसीत्। उभौ एतौ अन्तिमाचार्यौ स्तः। अनेन एव कारणेन अस्य शाङ्ख्यायनारण्यकस्य अन्तर्गता उपनिषद् कौषीतकि-नाम्ना ख्याता अस्ति।

पाठगतप्रश्नाः-३

२१. ऋग्वेदस्य द्वितीयम् आरण्यकं केन नाम्ना कथ्यते।
२२. कौषितकी उपनिषद् कस्यारण्यकस्य कं कम् अध्यायं अभिव्याप्य आख्यायते।
२३. शांख्यायनारण्यकस्य सप्तमाष्टमाध्यायौ अभिव्याप्य का उपनिषद् तिष्ठति।
२४. महाव्रतानुष्ठानं कदा भवति।
२५. महाव्रतानुष्ठानेन विहितानां विधानानां वर्णनं कुत्र अस्ति।
२६. मृत्योः अपसारणाय विशिष्टयागस्य वर्णनं कुत्र अस्ति।
२७. द्वादशाध्याये कस्य वर्णनम् अस्ति।
२८. जीवब्रह्मणोः ऐक्यं शांख्यायनारण्यके कस्मिन् अध्याये वर्णितमस्ति।
२९. पञ्चदशाध्याये किं वर्णितमस्ति।
३०. शांख्यायनारण्यकस्य द्रष्टा कः।
३१. शाङ्ख्यायनारण्यकस्य द्रष्टुः गुरोः नाम किम्।

६.४) बृहदारण्यकम्

आरण्यकमिदं यजुर्वेदेन सह सम्बद्धः अस्ति। किञ्च आत्मतत्त्वस्य विशेषविवेचकत्वेन इयम् उपनिषदपि कथ्यते। इदमपि आरण्यकं प्राचीनतमं मान्यतमं च अस्ति। कृष्णयजुर्वेदीयायाः मैत्रायणीयशाखाया अपि एकम् आरण्यकमस्ति, यत् मैत्रायणीयोपनिषद्-इति नाम्ना ख्यातमस्ति।

पाठगतप्रश्नाः-४

३२. बृहदारण्यकं केन वेदेन सम्बद्धः अस्ति।

३३. बृहदारण्यकस्य उपनिषदिति कथनस्य किं कारणम्।

३४. कृष्णयजुर्वेदीयायां मैत्रायणीशाखायाम् अन्तर्गतायाः उपनिषदः नाम किम्।

६.५) तैत्तिरीयारण्यकम्

अस्मिन् आरण्यके दश परिच्छेदाः अथवा प्रपाठकाः सन्ति। प्रपाठकोऽयं सामान्यतः 'अरण' इति पदेन ज्ञायते। अस्य नामकरणम् अपि तेनैव भवति। यथा प्रथमस्य प्रपाठकस्य नाम अस्ति- 'भद्रः', द्वितीयस्य- 'सहैव', तृतीयस्य- 'चितिः', चतुर्थस्य- 'युञ्जते', पञ्चमस्य- 'देव वै', षष्ठस्य- 'परे', सप्तमस्य- 'शिक्षा', अष्टमस्य- 'ब्रह्मविद्या', नवमस्य- 'भृगुः', दशमस्य- 'नारायणीयः' इति। अस्मिन् सप्तम-अष्टम-नवम-प्रपाठकाः मिलित्वा 'तैत्तिरीयोपनिषदि'ति कथ्यते। दशमप्रपाठकोऽपि महानारायणीयोपनिषदिति कथ्यते। अयं प्रपाठकः आरण्यकस्य परिशिष्टभागः वर्तते। प्रपाठकानां विभाजनम् अनुवाकेषु अस्ति। नवमप्रपाठकपर्यन्तम् अनुवाकसंख्या १०७ अस्ति। तैत्तिरीयब्राह्मणमिव अत्रापि प्रत्येकस्मिन् अनुवाके दशानां वाक्यानाम् एकः अङ्कः भवति। प्रत्येकं दशकस्य अन्तिमं पदम् अनुवाकस्य अन्तिमे परिगणितं भवति। अस्मिन् आरण्यके ऋङ्मन्त्राः उद्धृताः।

प्रथमः प्रपाठकः आरुण-केतुनामकस्य अग्नेः उपासनायाः तथा तदर्थम् इष्टिकाचयनस्य वर्णनं करोति। द्वितीयप्रपाठके स्वाध्यायस्य तथा पञ्चमहायज्ञानां वर्णनमस्ति। अत्र गङ्गा-यमुनयोः मध्यदेशः पवित्रः, तथा मुनीनां निवासाय उत्कृष्टभूमिः वर्णिता अस्ति। तृतीयप्रपाठकः चातुर्होत्रचितेः उपयोगिनां मन्त्राणां सङ्ग्रहोऽस्ति। चतुर्थाध्याये प्रवर्ग्यस्य उपयोगिनां मन्त्राणां सङ्ग्रहोऽस्ति। अत्र कुरुक्षेत्रस्य खाण्डवस्य च वर्णनं भौगोलिकस्थितेः अनुसारेण एवाऽस्ति। अस्मिन् प्रपाठके अभिचारमन्त्राणामपि सत्ता वर्तते। आभिचारिकमन्त्राणां प्रयोगः शत्रूणां नाशाय भवति। ४।२७ मन्त्रे तथा ४।३७ मन्त्रे 'छिन्धी भिन्धी हन्धी कट' एवंविधानां मन्त्राणां स्पष्टरूपेणात्र संकेतो वर्तते। ४।३८ मन्त्रे अथर्ववेदीयम् आभिचारिकमन्त्रं प्रति स्फुटरूपेण सङ्केतः प्राप्यते। पञ्चमे प्रपाठके यज्ञीयानां सङ्केतानाम् उपलब्धिः भवति। षष्ठे प्रपाठके पितृमेधसम्बन्धिनां मन्त्राणाम् उल्लेखोऽस्ति। सप्तम-अष्टम-नवमप्रपाठकेषु तैत्तिरीयोपनिषदस्ति। दशमे प्रपाठके नारायणीयोपनिषदस्ति। अस्य प्रपाठकसंख्याऽपि निर्दिष्टा नास्ति।

अस्मिन् आरण्यके स्थाने स्थाने कतिपयाः विशिष्टाः वार्ताः अपि प्राप्यन्ते। यथा (१) कश्यपस्यार्थो भवति सूर्यः। अस्य व्युत्पत्तिः पर्याप्तरूपेण वैज्ञानिकी वर्तते। ('कश्यपः पश्यको भवति। यत् सर्वं परिपश्यति सौक्ष्म्यात्' १।८।८) अर्थात् पश्यकशब्दात् वर्णव्यत्ययस्य नियमेन कश्यपशब्दः निष्पन्नो भवति। अनेन प्रकारेण वर्णव्यत्ययेन निष्पन्नस्य शब्दस्य सुष्ठु उदाहरणमिदम् अस्ति। (२)

पाराशर्यव्यासस्यापि अत्र उल्लेखः प्राप्यते (१।९।२)। (३) द्वितीयप्रपाठकस्यारम्भे एव सन्ध्यायां प्रयुक्तस्य सूर्यस्य अर्घजलस्य महिमा वर्ण्यते। तेन जलप्रभावेण मन्देहनामकस्य दैत्यस्य सर्वथा विनाशो भवति (२।२)।

सामवेदेन सम्बद्धम् अप्येकम् आरण्यकमस्ति। आरण्यकमिदं तवलकारारण्यकमिति नाम्ना प्रसिद्धमस्ति। इदमेव आरण्यकं 'जैमिनीयोपनिषद्ब्राह्मणमि'ति कथ्यते। अस्य चत्वारोऽध्यायाः सन्ति। प्रत्येकस्मिन् अध्याये अनुवाकाः सन्ति। चतुर्थाध्यायस्य दशमानुवाके प्रसिद्धः तवलकारः किंवा केनोपनिषदस्ति। अथर्ववेदस्य न किमपि आरण्यकम् उपलब्धमस्ति। अनेन वेदेन सम्बद्धाः या उपनिषदः सन्ति, ताः कस्यापि आरण्यकस्यांशो न भूत्वा प्रारम्भादेव स्वतन्त्रग्रन्थरूपेण विद्यमानाः सन्ति।

पुराणेषु आरण्यकस्य आचार्यरूपेण शौनकस्य नाम उल्लिखितमस्ति- 'शौनको नाम मेधावी विज्ञानारण्यके गुरुः' (पद्मपुरा० ५।१।१८) पुराणस्य वाक्यमिदं यथार्थमस्ति। यतः आचार्यशौनकः एको ब्रह्मवेत्ता ऋषिः आसीत्। अनेन वेदानाम् अध्यात्मपरका व्याख्या कृतास्ति। यतः अस्य वामीयभाष्ये आत्मानन्देन लिखितम्- 'अध्यात्मविषयां शौनकादिरीतिम्'। पद्मपुराणस्य विज्ञानारण्यकशब्दोऽपि आरण्यकस्वरूपस्य परिचायकोऽस्ति। आरण्यकं विज्ञानस्य, विशिष्टज्ञानस्य, अध्यात्मज्ञानस्य वा बोधको ग्रन्थोऽस्ति, इत्यपि अनेन ज्ञायते।

पाठगतप्रश्नाः-५

३५. प्रपाठकः सामान्यतया केन नाम्ना ज्ञायते।

३६. तृतीय-सप्तम-अष्टमप्रपाठकानां नामानि लिखत ।

३७. अन्तिमप्रपाठकस्य नाम किम्।

३८. तैत्तिरीयारण्यकस्य के अध्यायाः तैत्तिरियोपनिषद् इति कथ्यन्ते।

३९. तैत्तिरीयारण्यके कस्मिन् प्रपाठके गङ्गायमुनयोः कथा वर्णिता अस्ति।

४०. पञ्चमप्रपाठके कस्य वर्णनमस्ति।

४१. परे इति कस्य प्रपाठकस्य नाम ।

४२. काश्यपस्य कः अर्थः।

४३. द्वितीयप्रपाठकस्य आरम्भे किं किं वर्णितमस्ति।

४४. प्रपाठकानां विभाजनं कथं भवति।

४५. सामवेदसम्बन्धिनः आरण्यकस्य नाम किम्।

४६. तवलकारारण्यकं केन नाम्ना कथ्यते।

४७. केनोपनिषद् कस्मिन् अनुवाके अस्ति।

४८. आरण्याचार्यः कः।

४९. वेदानाम् अध्यात्मिकपरका व्याख्या केना कृता अस्ति।

६.६) अथ उपनिषदां सामान्यपरिचयः

भारतीयदर्शनसाहित्ये सन्ति त्रीणि श्रुतिस्मृतिन्यायाख्यानि प्रस्थानानि। तानि वेदान् एव अवलम्ब्य स्थितानि। तानि मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनम् च उपदिशन्ति। उपनिषत् प्रस्थानत्रय्यां प्रथमप्रस्थानम् आवहति यतो हि एषा एव भारतीयविचारशास्त्रस्य श्रेष्ठः उपजीव्यग्रन्थः। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानमिति कथ्यते। कथं गीता द्वितीयप्रस्थानम् इति अधःस्थितेन श्लोकेन स्पष्टं भवति-

'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।

पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।'

बादरायणव्यासप्रणीतं ब्रह्मसूत्रं तृतीयप्रस्थानमस्ति। तत्र आपाततो विरोधिनाम् उपनिषद्वाक्यानां समन्वयः सम्यक् प्रदर्शितः। तेन सर्वेषामपि वाक्यानां ब्रह्मनिष्ठत्वं सिध्यति। अपि च तार्किकाणां युक्तयोऽपि अत्र निराकृताः सन्ति। भारतीया वैदिकधर्मग्रन्था दर्शनानि च इदमेव प्रस्थानत्रयम् अवलम्बन्ते।

उप-नि-पूर्वकात् विशरणगत्यवसादनार्थकात् 'षद्लृ'-धातोः क्विप्प्रत्यये रूपम् उपनिषदिति। उपनिषदाम् अध्ययनेन ऐहिकविषयेषु तथा आमुष्मिकविषयेषु च वैराग्यं स्वीकृतवतां मुमुक्षूणां संसारस्य बीजभूता विद्या नश्यति। तदा मुमुक्षुः पुरुषः ब्रह्म प्राप्नोति, दुःखानि च दूरीभवन्ति। ब्रह्मणः स्वरूपस्य तत्प्राप्त्युपायस्य जीवस्य जगतश्च तथा आत्मादिविषयाणां सविस्तरं वर्णनम् उपनिषदि अस्ति। अतः अस्य 'उपनिषद्' इत्येषा संज्ञा युक्ता एव।

'सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्' इत्येतद् मुक्तिकोपनिषद्वाक्यम्। एतेन ज्ञायते यद् उपनिषदः अष्टोत्तरशततः अपि अधिका आसन्। किन्तु अष्टोत्तरशतसंख्याकाः उपनिषदः एव प्राप्ताः। एतासु उपनिषत्सु प्रायेण द्वादश उपनिषदः प्राचीनाः विशदतया च विषयं प्रतिपादयन्ति। अतः एताः प्रामाणिकाः भवन्ति। तत्र १० उपनिषदः ऋग्वेदसम्बद्धाः, १९ उपनिषदः शुक्लयजुर्वेदसम्बद्धाः, ३२ कृष्णयजुर्वेदसम्बद्धाः, १६ सामवेदसम्बद्धाः, ३१ अथर्ववेदसम्बद्धाः। वेदान्ताचार्याः एतासाम् उपनिषदां व्याख्यानानि विरचितवान्। तासु अपि दश उपनिषदः प्रसिद्धाः।

ऋग्वेदीयोपनिषत्सु एतरेय-कौषीतकी, सामपरकोपनिषत्सु छान्दोग्य-केनोपनिषदौ, कृष्णयजुर्विषयकासु उपनिषत्सु तैत्तिरीय-महानारायण-कठ-श्वेताश्वेतर-मैत्रायण्युपनिषदः, शुक्लयजुरित्यधिकृत्य लिखिता ईशावास्योपनिषद् बृहदारण्यकं किञ्च अथर्ववेदीयासु मुण्डक-माण्डुक्य-प्रश्नोपनिषदः नितरां प्रथिताः प्राचीनाः सर्वत्र लभ्यमानाश्च सन्ति। मुण्डकोपनिषदि उपनिषदां संख्या निम्नरूपेण वर्णितास्ति-

'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।

ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।'

एतासु दश उपनिषदः प्रसिद्धाः- ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषदः। किञ्च श्वेताश्वेतरोपनिषद् अपि प्रसिद्धा।

कतिचन उपनिषदो गद्यात्मिकाः, कतिचन पद्यात्मिकाः कतिचन गद्यपद्योभयात्मिकाश्च। आसामुपनिषदां कालो विभिन्नः, परस्मिन् काले प्रसिद्धाः कतिचन उपनिषदो बुद्धकालात् प्राचीनाः इति संस्कृतसाहित्यस्य इतिहासविदो वदन्ति।

सप्तदशशतके दाराशिकोहनामा शाहजहॉन-नामकस्य सम्राजः पुत्रः ५० संख्यकाः उपनिषदः पारसीभाषायां ब्राह्मणपण्डितानां साहाय्येन अनूदितवान्। शोपेन हावेर (Shopen Howers) -नाम्ना प्रसिद्धो वैदेशिको दार्शनिकः उपनिषदः स्वगुरुषु गणयति स्म। सम्प्रति अपि पाश्चात्येषु उपनिषदां महान् प्रभावो विद्यते, प्रायः सर्वासु एव सभ्यभाषासु आसाम् उपनिषदाम् अनुवादो जातः।

उपनिषद् अतिसरलशैल्या तत्त्वं कथयति, तेन तासां महत्त्वं लोकप्रियत्वं च प्रतिदिनं वर्धते। यथा कठोपनिषदि-

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।'

भगवद्गीतापि उपनिषदेव इति बोध्यम्।

पूर्वमेवोक्तं मया इमाः उपनिषद एकस्मिन् काले न प्रणीता अपि तु काले काले ताः रचिता अभूवन्। प्रधानाः उपनिषदो बुद्धात् प्राक् एव प्रणीताः। आसामुपनिषदां कः कालः कः वा एतेषां मध्ये पारस्परिकसम्बन्धः इति ज्ञातुम् प्राचीनविद्वांसः अतीव उद्योगं कृतवन्तः। जर्मनविद्वान् डायसनमहोदयः तु उपनिषदं चतुर्षु स्तरेषु विभक्तां कृतवान्।

(क) प्राचीनगद्योपनिषदः- यासां गद्यं ब्राह्मण-गद्यमिव प्राचीनं, लघुकायं सरलं च अस्ति। यथा- (१) बृहदारण्यकोपनिषद्, (२) छान्दोग्योपनिषद्, (३) तैत्तिरीयोपनिषद्, (४) ऐतरेयोपनिषद्, (५) कौषीतकि-उपनिषद् (६) केनोपनिषच्चेति।

(ख) प्राचीनपद्योपनिषदः- यासां पद्यं प्राचीनं, सरलं तथा वैदिकपद्यम् इव अस्ति। यथा- (७) कठोपनिषद्, (८) ईशोपनिषद्, (९) श्वेताश्वेतरोपनिषद् (१०) महानारायणोपनिषच्चेति।

(ग) उत्तरकालिकगद्योपनिषदः- (११) प्रश्नोपनिषद्, (१२) मैत्रायणीयोपनिषद् (१३) माण्डूक्योपनिषच्चेति।

(घ) आथर्वणोपनिषदः- यासामुपयोगः तान्त्रिकोपासनायां विशिष्टरूपेण स्वीकृतमस्ति- (१) सामान्योपनिषद्, (२) योगोपनिषद्, (३) सांख्यवेदान्तोपनिषद्, (४) शैवोपनिषद्, (५) वैष्णवोपनिषद्, (६) शाक्तोपनिषच्चेति।

अस्मिन् क्रमसाधने बहून् दोषान् दर्शयित्वा डॉ० बेल-वेलकर-राणाडेमहोदयाभ्याम् एकाम् अभिनवयोजनां प्रस्तुतवान्। Belvelkar and Ranade- History of Indian Philosophy. Vol २ p.p. अस्मिन् ग्रन्थे ८७-९० पृष्ठे उपनिषदां रचनाकालः प्रदर्शितः किन्तु स एतावान् काल्पनिकः अप्रामाणिकः च वर्तते यत् विश्वासयोग्यः न भवति। ईशावास्योपनिषदः द्वितीयस्तरे स्थापनं कदापि न्यायसङ्गतं न भवति। यतो ह्यस्मिन् यज्ञस्य महत्त्वं ब्राह्मणकाले एव स्वीकृतमस्ति ('कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः') तथा बृहदारण्यके कर्मसंन्यासभावनायाः घोषणा नास्ति एव इति ('पुत्रैषणायाश्च लोकैषणायाश्च ह्युत्थाय भिक्षाचर्यं चरन्ति'- बृहदारण्य०)। अन्यासाम् उपनिषदाम् इव ईशोपनिषद् आरण्यकस्य अंशो न भूत्वा माध्यन्दिनसंहितायाः भागः अस्ति। मुक्तिकोपनिषदः मान्यपरम्परानुसारेण इयं समस्तानाम् उपनिषदां गणनायां प्रथमस्तरीया एव अस्ति। अतो बेलवेलकर-महोदयस्य कथनं कस्यापि तत्त्वजिज्ञासोः जनस्य हृदये विश्वासं नोत्पादयति।

श्रीचिन्तामणिविनायकवैद्योऽपि स्वग्रन्थे उपनिषदां प्राचीनतां प्रमाणयितुं साधनद्वयं समुपस्थापयति। विष्णोः शिवस्य च परदेवस्वरूपे वर्णनं, प्रकृति-पुरुषस्य तथा सत्त्व-रजस्तमसां त्रिविधगुणानां साङ्ख्यसिद्धान्तस्य प्रतिपादनं च। अयं सम्यक् सिद्धान्तः इति प्रतिभाति। तिलकमहोदयानुसारेण उपनिषत्कालः १९०० वि० पूर्वं शतकेन भवितव्यम्। अनेन प्रकारेण उपनिषत्कालस्य समारम्भः २५०० वि० पूर्वं शतकं कथयितुं शक्यते।

वस्तुतः आरण्यकस्य परिशिष्टभूता उपनिषत्। आरण्यके आरब्धा अध्यात्मतत्त्वालोचना उपनिषत्सु एव परां स्फूर्तिं लभमाना परिसमाप्ता। वेदस्य अन्तिमत्वात् लक्ष्यत्वात् च वेदशिरोभूता उपनिषद् एव वेदान्ता इत्युच्यन्ते। उपनिषच्छब्दस्यार्थो ब्रह्मविद्या। ब्रह्मविद्या संसाररिणः सादयति विशादयति शिथिलयति। ब्रह्मविद्यैव उपनिषत् तथापि यथा आयुर्वर्द्धके घृते आयुर्वै घृतम् इति आयुश्शब्दस्य औपचारिकः प्रयोगो भवति तद्वत् ब्रह्मविद्यायाः प्रकाशके ग्रन्थेऽपि उपनिषच्छब्दस्य औपचारिकः प्रयोगो भवति। ब्रह्मैव एकं सद् अन्यत् सर्वं रज्जौ सर्प इव ब्रह्मणि अविद्यया आच्छादितम् असदेव। जीवा हि अविद्यायाः प्रभावात् असद् वस्तु सद्रूपेण पश्यन्ति। स्वरूपतो निष्कामा ब्रह्मभूता अपि स्वस्वरूपं विस्मृत्य अभिन्नमपि भिन्नं मत्वा कामयन्तः द्विषन्तो वा कर्माणि अनुतिष्ठन्ति। तेन च ते तेषां कर्मणां शुभाशुभं फलम् उपभुञ्जते। यावत् मायाया अपाकृतिः न भवति तावत् इयम् अविरामा संसारावृत्तिः चलति। अतः निष्कामकर्मद्वारा यदा चित्तशुद्धिः भवति तदा इहामुत्रफलभोगविरागवान् शमदमादिषट्सम्पत्तिम् अर्जयित्वा संसारतापदाहम् असहमानो मुमुक्षुः यदि ब्रह्मज्ञं गुरुमुपसद्य तन्मुखाद् वेदान्तवाक्यं श्रुत्वा मननं निदिध्यासनं च आचरति तदा समाधौ ब्रह्मणि लीनस्य तस्य माया विध्वस्ता भवति। सर्वत्र आत्मानम् आत्मनि च सर्वम् अवलोकयति सः। तस्य किमपि द्वेष्यं काम्यं वा न तिष्ठति। तदर्था चेष्टापि न भवति। कर्माभावात् फलमपि न फलति। फलाभावात् फलोपभागाय शरीरपरिग्रहोऽपि नावश्यकः। स ब्रह्मवित् पुनर्न जायते। यावत् प्रारब्धक्षयो न जायते तावत् स शरीरधारणाय आवश्यककर्ममात्रम् अनुतिष्ठति कर्तव्यमात्रबुद्ध्या। यथा पुरुषः सिक्थमूर्तिं पश्यन् तस्याः सिक्थपिण्डमात्रस्वरूपतामपि पश्यति, तद्वत् ब्रह्मविदपि जगत् सर्वं पश्यन्नपि ब्रह्मस्वरूपतामपि पश्यति। क्षीणे च प्रारब्धे सर्पवत् शरीरं त्यक्त्वा ब्रह्मणि लीयते। ब्रह्मैव सद् ब्रह्म अप्येति इति वेदान्तसारः।

क) ऋग्वेदे मुख्या उपनिषदः - ऐतरेयोपनिषत्, बह्वृचोपनिषत्, निर्वाणोपनिषत् चेति।

ख) सामवेदे मुख्या उपनिषदः - छान्दोग्योपनिषत्, केनोपनिषत्, सन्न्यासोपनिषत् चेति।

ग) कृष्णयजुर्वेदे मुख्या उपनिषदः - तैत्तिरीयोपनिषत्, कठोपनिषत्, श्वेताश्वेतरोपनिषत् चेति।

घ) शुक्लयजुर्वेदे मुख्या उपनिषदः - बृहदारण्यकोपनिषत्, ईशोपनिषत्, भिक्षुकोपनिषत् चेति।

ङ) अथर्ववेदे मुख्या उपनिषदः - प्रश्नोपनिषत्, मुण्डकोपनिषत्, माण्डूक्योपनिषत्, नृसिंहतापनीयोपनिषत् चेति।

एता विहाय अन्या अपि काश्चन उपनिषदः वर्तन्ते। श्रीमद्भगवच्छङ्कराचार्यपादैः यासाम् एकादशोपनिषदां भाष्याणि विरचितानि ताः सन्ति - 'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-ऐतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यक-श्वेताश्वतरोपनिषद' इति।

अधुना केनोपनिषदं तथा छान्दोग्योपनिषदं संक्षेपेण अवगच्छामः।

६.७) केनोपनिषद्

उपनिषीदति प्राप्नोति ब्रह्मत्यभावम् अनया इति उपनिषत्। उपनिषच्छब्देन प्राध्यान्यतो वेदान्त उच्यते। तदुच्यते वेदान्तो नाम उपनिषत्प्रमाणमिति। ईशादीनां दशानाम् उपनिषदां मध्ये केनोपनिषदः स्थानं द्वितीयम् आमनन्ति वेदान्तविदः। इयम् उपनिषद् सामवेदीयतलवकारशाखान्तर्गता। शङ्करभगवत्पादानां नये यद्यपि उपनिषच्छब्देन ब्रह्मविद्यैव उच्यते, तथापि ग्रन्थे उपनिषच्छब्दव्यवहारः सम्भवति। ब्रह्मविद्यायामुपनिषच्छब्दो मुख्यया वृत्त्या वर्तते, ग्रन्थबोधस्तु लक्षणया।

इयम् उपनिषद् केनेषितं पतति प्रेषितं मनः इत्यादिकात् मन्त्रादारभ्यते। तत्र मन्त्रादौ केनेति पाठात् केनोपनिषदिति अन्वयसंज्ञा। एवम् ईशावास्यमिदं सर्वम् इति मन्त्रांशमादाय ईशावास्योपनिषदिति नामापि श्रूयते। सर्वासामुपनिषदाम् अखण्डे ब्रह्मणि पर्यवसानाद् निर्विशेषमात्मतत्त्वम् उपनिषत्सु मुख्यतया प्रतिपाद्यम्। एवञ्च अस्या उपनिषदोऽपि तदेव प्रतिपाद्यं तत्त्वम्। शङ्करभगवत्पादानामस्यां महती रुचिः परिलक्ष्यते। एनां व्याख्यातुकामो भगवान् भाष्यकारः भाष्यद्वयं विरचितवान्। अस्या उपनिषद आरम्भः प्रश्नप्रतिवचनाभ्यां दृश्यते। रथादयः चेतनावद् अधिष्ठिताः प्रवृत्तिमर्हन्ति न अनधिष्ठिताः। मन-आदीनां च अचेतनानां लोके प्रवृत्तिर्दृश्यते। चेतनावतः अधिष्ठातुः अस्तित्वे तदेव लिङ्गम्। अतः करणानाम् अधिष्ठाता यश्चेतनावान् स किं विशेषणम् इति जिज्ञासोः प्रश्नः। तत्समाधानाय उत्तरगर्भोऽयं मन्त्र आम्नायते-

श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः।

चक्षुषश्चक्षुः अतिमुच्य धीरा प्रेत्यास्माल्लोकादमृता भवन्ति।। इति।

विक्रियादिविशेषरहितस्य आत्मनो मनआदिप्रवृत्तौ निमित्तत्वम् इति उत्तरार्थः। अत एव श्रीमदानन्दगिरिणा कृतायां टीकायां 'मन आदीनां यः प्रवर्तकः स किं विशेष इति प्रश्नस्य निर्विशेषता एव विशेष इति उत्तरम्' इति उक्तम्। एवञ्च सर्वोपाधिविनिर्मुक्तं तद् ब्रह्मतत्त्वं रूपरहितत्वात् चक्षुषा न गृह्यते। अशब्दत्वाद् वाचा न उच्यते। अतीन्द्रियत्वेन मनसा न मन्यते। अत्र एव 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते

तदेव ब्रह्म तं भेदं यदिदमुपासते' इत्यादयो मन्त्राः द्रष्टव्याः। इदमेव आत्मतत्त्वं सर्वैः अवश्यं साक्षात् करणीयम्। अन्यथा महती विनष्टिः स्यादेव। विज्ञाते तु तस्मिन् परे तत्त्वे, मृत्युमतिक्रम्य अमृतत्वम् अधिगच्छन्ति साधकाः। अत एव भूयो भूयो वार्तेयं वेदानां -'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति शम्।

६.८) छान्दोग्योपनिषत्

अत्र एका उपनिषत् संक्षेपेण उच्यते। सा च छान्दोग्योपनिषत्। सामवेदीयोपनिषत्सु अन्यतमा हि छान्दोग्योपनिषत्। उपनिषदियं सामवेदस्य छान्दोग्यब्राह्मणस्य अंशविशेषा। अष्टाध्यायसमन्विता इयमुपनिषत्। प्रत्येकम् अध्याये पुनः केचन खण्डाः सन्ति। साकल्येनात्र चतुःपञ्चाशदधिक-एकशतखण्डास्तथा अष्टाविंशत्यधिक-षट्शतमन्त्राः सन्ति। प्रथमाध्यायस्य प्रारम्भे ओङ्कारोपासना दृश्यते। एषा उपासना उद्गीतसञ्ज्ञीतस्य अङ्गभूता। तदुक्तम्

'ओमित्येतदक्षरमुद्गीतमुपासीत' इति।

तत्र कानिचन उपाख्यानानि सन्ति। तेष्वन्यतमं हि सत्यकामजावालयोः उपाख्यानम् , उपकोसलस्य उपाख्यानं चेति।कर्मोपासनाब्रह्मविद्यानां समन्वयोऽत्र आलोचितः। कर्मवदुपासनापि सकामनिष्कामभेदेन द्विविधा। ये जनाः शास्त्रीयाचारं न पालयन्ति तैः अधोगतिः प्राप्यते। तदुक्तम् -

अथैतयोः पथोर्न कतरेणचन तानीमानि।

क्षुद्रान्यसकृदावर्तीनि भूतानि भवन्ति।। इति।

ये जना उपासनात् इष्टापूर्तकर्मभ्यश्च विरमन्ते ते भूयो भूयः संसारचक्रे जीवरूपेण आविर्भवन्ति। कर्मणा चित्तशुद्धिर्जायते, उपासनया भक्तिभावो जागृतो भवति, तेनैव भवति ब्रह्मोपलब्धिः। गुरूपदेशोऽत्र मुख्यं प्रयोजनम् आवहति। इन्द्रवद् देवश्रेष्ठोऽपि ब्रह्मज्ञानलाभाय शतानि वत्सराणि गुरुगृहे यापितवान्।

षष्ठाध्याये आरुणि-श्वेतकेतोः उपाख्यानेन आत्मतत्त्वं विवृतम्। तत्र उद्दालकेन उक्तं ' स आत्मा तत्त्वमसि श्वेतकेतो' इति। आरुणिः श्वेतकेतुम् उपदिष्टवान् यत् सच्चिदानन्द आत्मैव ब्रह्मस्वरूपः। तेनैव जगत्सर्वं परिव्याप्तम्। स एव परमसत्यरूपः। सप्तमाध्याये नामब्रह्म-वाग्ब्रह्मादेः रूपमालोचितम्। अष्टमाध्याये वर्णितो ब्रह्मोपलब्धेरुपदेशः। उपनिषदः अन्तिमांशे वर्तते ब्रह्मोपासनाया वर्णनम्। तत्राम्नातं यो जनो ब्रह्मचर्य-गार्हस्थादीन् धर्मान् परिपाल्य इन्द्रियाणि संयम्य शास्त्रानुमोदितविषयं विहाय सर्वेषु विषयेषु हिंसां विजहाति, स एव ब्रह्मलोकं प्राप्नोति।

पाठगतप्रश्नाः-६

५०. कः प्रस्थानत्रयस्य उपजीवी।

५१. प्रस्थानत्रयस्य नामानि लिखत ।

५२. गीतायाः द्वितीयप्रस्थानत्वेन किं प्रमाणम्।

५३. तृतीयप्रस्थानं केन प्रणीतम्।

५४. षद्लृधातोः कः अर्थः।

५५. उपनिषद्-शब्दस्य व्युत्पत्तिं लिखत?

५६. कतिविधा उपनिषदः आसन्।

५७. काः उपनिषदः अधुना लभ्यन्ते।

५८. ईशकेनकठ - इत्यादि श्लोकं पूरयत?

५९. ऋग्वेदीयोपनिषदां नामानि लिखत ।

६०. यजुर्वेदीयोपनिषदां नामानि लिखत ।

६१. कथम् उपनिषदः लोकप्रियाः।

६२. आत्मानं रथिनं विद्धि -- इत्यादिं श्लोकं पूरयत ।

६३. डयसनमहोदयानुसारेण उपनिषदः कतिविधाः भेदाः। के च ते।

६४. प्राचीनगद्योपनिषदि काः उपनिषदः अन्तर्गताः।

६५. उत्तरकालिकोपनिषदि काः उपनिषदः अन्तर्गताः।

६६. ईशावास्योपनिषदः प्राचीनपद्योपनिषदि स्थापनं न युक्तम्, तत्प्रमाणवाक्यं लिखत ।

६७. तिलकमहोदयानुसारेण उपनिषत्कालः कदा आरभ्यते।

पाठसारः

अस्मिन् पाठे वयम् आदिमे भागे आरण्यकानां विषये विस्तरेण ज्ञातवन्तः। नगरे स्थित्वा वेदस्य तत्त्वज्ञानं सुदुष्करमासीत्। अतः पारमार्थिकस्वरूपस्य ज्ञानाय मुनयः अरण्ये एव स्वाश्रमादिकं निर्माय शिष्येभ्यः तत्त्वज्ञानम् उपदिष्टवन्तः। अतस्तस्मादेव आरण्यकग्रन्थानाम् उत्पत्तिः जाता। उच्यते च अरण्याध्ययनादेतद् आरण्यकमितीर्यते इति। ऐतरेयारण्यक - शाङ्खायनारण्यक -बृहदारण्यक-तैत्तिरीयारण्यकानां विषये भवन्तः सामान्यज्ञानं प्राप्तवन्तः। पाठस्य परस्मिन् भागे च उपनिषदां विषये उक्तम्। भारतीयविचारशास्त्रस्य सर्वश्रेष्ठः उपजीव्यग्रन्थः उपनिषदेव। आ बहोः कालाद् अस्माभिः

उपनिषदः पूज्यन्ते। उपनिषदि रस-गुण-अलङ्कारादिभिः गुम्फितैः शब्दराशिभिः ब्रह्मतत्त्वं प्रतिपादितम्। न केवलं सन्न्यासिनः, अपि तु संसारे स्तिताः सनातनजनाः तासाम् उपनिषदां श्रद्धया अध्ययनं कृत्वा तत्त्वज्ञानं लब्धुम् इच्छन्ति। अत्र मुख्यतया द्वे केनोपनिषत्-छान्दोग्योपनिषदौ संक्षेपेण व्याख्याते।

पाठान्तप्रश्नाः

१. आरण्यकस्य सामान्यपिरचयं लिखत।
२. शाङ्ख्यायनारण्यकस्य सारं लिखत।
३. आरण्यकस्य भागानि तेषां नामनि प्रपाठकादीनि च चित्ररुपेण प्रकटयत।
४. ऐतरेयाण्यकविषये लिखत।
५. उपनिषदः सामान्यपरिचयं लिखत।
६. छान्दोग्योपनिषदं व्याख्यात।
७. केनोपनिषदं व्याख्यात।
८. तैत्तिरीयोपनिषदं व्याख्यात।
९. उपनिषदां सामान्यपरिचयं लिखत।

प्रश्नानामुत्तराणि

उत्तराणि-१

१. ब्राह्मणानाम्।
२. 'अरण्याध्यनादेतद् आरण्यकमितीर्यते।
   अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते।।'
३. अरण्यस्य एकान्तशान्तवातावरणम्।
४. आरण्यकस्य।
५. वेदेभ्यः ओषधिभ्यः।
६. 'आरण्यकञ्च वेदेभ्य ओषधिभ्योमृतं यथा।'
७. आरण्यकम्।
८. यज्ञस्य गूढरहस्यस्य।
९. ब्रह्मविद्यायाः।
१०. आरण्यकस्य प्रतिपाद्यविषयः प्राणविद्या, उपनिषदः प्रतिपाद्यविषयः निर्गुणब्रह्मणः प्राप्तिः इति तयोः प्रतिपाद्यविषये भेदः।

उत्तराणि-२

११. ऋग्वेदे।

१२. ऐतरेयब्राह्मणस्य।

१३. महाव्रतस्य।

१४. निष्कैवल्यशस्त्र -प्राणविद्या-पुरुषप्रभृतीनाम्।

१५. निष्कैवल्यशस्त्रस्य वर्णनमस्ति।

१६. संहितोपनिषत्।

१७. पदक्रमपाठादीनां वर्णनम् अस्ति।

१८. यथाक्रमेण ऐतरेयः, आश्वलायनः।

१९. शौनकः।

२०. पुरातनम्।

उत्तराणि-३

२१. शाङ्ख्यायनारण्यकम्।

२२. शाङ्ख्यायनारण्यकस्य आतृतीयाध्यायात् षष्ठ्याध्यायपर्यन्तम्।

२३. संहितोपनिषत्।

२४. वर्षावधौ सम्पाद्यमानस्य गवामयननामकयज्ञस्य यः अन्तिमदिवसः तस्य समीपदिवसे पूर्वदिवसे वा।

२५. शाङ्ख्यायनश्रौतसूत्रे।

२६. एकादशतमे।

२७. बिल्वफलेन मणिनिर्माणस्य प्रक्रियायाः, कालस्य तथा स्वरूपस्य च।

२८. त्रयोदशचतुर्दशतमाध्याये।

२९. आचार्यस्य वंशवर्णनम् अस्ति।

३०. गुणाख्यशाङ्ख्यायनः।

३१. कौहलः कौषीतकि इति।

उत्तराणि-४

३२. यजुर्वेदेन।

३३. अत्र आत्मतत्त्वस्य विशेषविवेचकत्वात्।

३४. मैत्रायणीयोपनिषत्।

उत्तराणि -५

३५. अरण इति।

३६. यथाक्रमेण चितिः, शिक्षा, ब्रह्मविद्या।

३७. नारायणीयः।

३८. सप्तम -अष्टम-नवमप्रपाठकाः।

३९. द्वितीयप्रपाठके।

४०. यज्ञीयसंकेतानामुपलब्धिः।

४१. षष्ठ।

४२. सूर्यः।

४३. संध्यायां प्रयुक्तस्य सूर्यार्घस्य जलस्य महिमा वर्णिता अस्ति।

४४. अनुवाकेषु।

४५. तवलकारारण्यकम्।

४६. जैमिनीयोपनिषद्ब्राह्मणम्।

४७. चतुर्थाध्यायस्य दशमानुवाके।

४८. शौनकः।

४९. शौनकेन।

उत्तराणि-६

५०. वेदः।

५१. उपनिषत्,गीता,ब्रह्मसूत्रम्।

५२. 'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।'

५३. बादरायणेन।

५४. विशरमगत्यवसादनार्थः।

५५. उपपूर्वकात् निपूर्वकात् षद्धातोः क्विपि उपनिषच्छब्दस्य निष्पत्तिः।

५६. अष्टोत्तरशततोऽप्यधिका।

५७. दश।

५८. 'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।'

५९. एतरेय-कौषीतकी।

६०. तैत्तिरीय-महानारायण-कठ-श्वेताश्वतर-मैत्रायण्युपनिषद् ईशावास्योपनिषद् बृहदारण्यकम्।

६१. उपनिषद् अतिसरलशैल्यां तत्त्वं ग्राहयन्ति।

६२. **'आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।'

६३. चतस्रः। प्राचीनगद्योपनिषत्, प्राचीनपद्योपनिषत्, उत्तरकालिकगद्योपनिषत्, अथर्वाणोपनिषत्।

६४. कठोपनिषद्, ईशोपनिषद्, श्वेताश्वतरोपनिषद् महानारायणोपनिषच्चेति।

६५. प्रश्नोपनिषद्, मैत्रायणीयोपनिषद् माण्डूक्योपनिषच्चेति।

६६. कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः'।

६७. २५०० वि पूर्वशतकम्।

।।इति षष्ठः पाठः।।